# संस्कृत
# कार्यें स्वागतम

## सिंह-शशक-कथा

**प्रस्तुतकर्ता**

श्रिप्रकाश रथ

अग्रिम

# सिंह-शशक-कथा



# सिंह-शशक-कथा

**बुद्धिः यस्य बलम तस्य निर्बुद्धेस्तु कुतो बलम्? ।**
**वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥**

**कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ वीर्यातिरेकान्नित्यमेवानेकान्**

अथ तेषां तदवचनमाकर्ण्य भासुरक आह -- "अहो सत्यमभिहितम भवाद्भिः । करं यदि ममोपविष्टस्यात्र नित्यमेव नैकेको मृगः समागमिष्यति तन्नूनं सर्वानपि भक्षयिष्यामि" ।

अथ ते तथेति प्रतिज्ञाय निवृतिभाजस्त्रव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं जातिक्रमेण वृद्धो वा, वैराग्ययुक्तो वा, शोकग्रस्तो वा, पुत्रकलत्रनाशभीतो वा तेषां नध्यात्तस्य भोजनार्थं मध्याह्नसमये

अथ कदाचिज्जातिक्रमाच्छशकस्यावसरः समायातः । स समस्तमृगप्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता कूपः संदृष्टः । यावत्कूपोपरि याति तावत्कूपमध्ये आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वा च तेन हृदयेन चिन्तितम् यद् -- भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्धयाऽस्मिन्कूपे पातयिष्यामि ।

अथासौ दिनशेषे भासुरकसमीपं प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः ।

कोपाविष्टः सक्कणी परिलिहन्नचिन्तयत् -- अहो प्रातराहाराय निःसत्त्वं वनं मया कर्तव्यम् । एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य तस्याऽग्रे स्थितः ।

अथ तं लतात्मा भासुरको भर्त्सयन्नाह -- "रे शशकाधम ! एकस्तावत्त्व लघुः प्राप्तः अपरतो वेलातिक्रमेण । तदस्मादपराधात् त्वां निपात्य, प्रातः सकलान्यपि मृगकुलान्युच्छेदयिष्यामि ।"




अथ शशकः सविनयं प्रोवाच --" स्वामिन् ! नापराधो मम, न चान्यमृगाणाम् । तच्छ्रूयतां कारणम् ।"

सिंह आह -- "सत्वरं निवेदय यावन्मम् दंष्टान्तर्गतो न भवान्भविष्यति ।

शशक आह -- "स्वामिन् समस्तमृगैरद्य जातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय, ततोऽहं पञ्चशशकैः समं प्रेषितः । ततमाश्चाहमागच्छन्नन्तराले महता केनचिदपरेण सिंहेन

ततो मयाभिहितम् -- "वयं स्वामिनो भासुरकसिंहस्य सकाशमाहारार्थ समयधर्मेण गच्छामः " ।

ततस्तेनाभिहितम् -- "यद्येवं तर्हि मदीयमेतद्वनम् । मया सह समयधर्मेण समस्तैरपि श्वापदैर्वर्तितव्यम् । चौररूपी स भासुरकः । अथ यदि सोऽत्र राजा ततो विश्वासस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्, येन यः कश्चिदावयोर्मध्यापराक्रमेण राजा भविष्यति" इति ।



ततोऽहं तेनादिष्टः स्वामिसकाशमभयागतः । ऐतद्वलाव्यतिक्रमकारणम् । तदत्र स्वामी प्रमाणम् ।

तच्छ्रुत्वा भासुरक आह - "भद्र! यद्येवं , तत्सत्वरं दर्शय मे तं चौरसिंहं, येनाहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि ।" उक्तञ्च

भूमिमित्रं हिरण्यम च विग्रहस्य फलत्रयम् ।
नास्त्येकमपि यद्येषां न त कुर्यात्छञ्चन ॥

शशक आह --" स्वामिन् सत्यमिदम् ।
सवभूमिहितोः परिभवाच्च युद्धयन्ते
क्षत्क्षियाः । परं स दुर्गाश्रयः , दुर्गान्निष्क्रम्य
वयंतेन विषकम्भिताः । तो दुर्गस्थो
दुःसाध्यो भवति रिपुः ।"

भासुरक आह -- "भोः ! किं तवानेन
व्यापारेण ? दर्शय मे तं दुर्गस्थमपि ।"



शशक आह -- "यद्येवं तर्ह्यागच्छतु स्वामी ।"
एवमुक्त्वाSग्रे व्यवस्थितः । ततश्च तेनाSSगच्छता
यः कूपो दृष्टोSभूत्तमेव कूपमासाद्य भासुरकमाह
-- "स्वामिन् ! कस्ते प्रतापं सोढुं समर्थः । त्वां
दृष्ट्वा दूरतोSपि चौरसिंहः प्रविष्टः स्वं दुर्गम् ।
तदागच्छ, येन दर्शयामि" इति ।
भासुरक आह -- "दर्शय मे दुर्गम्"



तदनु दशिस्तेन कूपः । ततः सोऽपि मूर्खः सिंहः कूपमध्ये आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादं मुमोच । ततः प्रतिशब्देन कूपमध्याद् दविगुणतरो नादः समुत्थितः । अथ तेन शत्रुं मत्वातमानं तस्योपरि प्रक्षिप्य , प्राणाः परित्यक्ताः । शशकोऽपि हृष्टमनाः

धन्यवाद